# DEPARTMENT OF SANSKRIT
# UNIVERSITY OF MUMBAI
## M.A. Entrance Examination 2017-2018
## Paper 1: Unseen Translation

Date: 07/09/2017 Duration: 3 hours
Day: Thursday Marks: 100

Q.1. Translate into English / Marathi (15 marks each)

1. ततः सः स्वीयां चलदूरवाणीं प्रति आगतान् सन्देशान् पर्यशीलयत्। बहवः सामान्याः सन्देशाः एव। कश्चन विशेषसन्देशः आगतः आसीत् आरक्षकमहानिदेशतः। राजदूतेन जार्ज-रिचर्डसनेन सम्बद्धे प्रकरणे दर्शितस्य असाधारणकौशलस्य प्रशंसा कृता आसीत् तेन। अस्य वर्षस्य प्रशस्तेः निमित्तं भवतः नाम सूचयिष्यते इत्यपि तत्र लिखितमासीत्। भैरवस्य मुखे मन्दहासः आगत्य निर्गतः। आरक्षकप्रशिक्षणनिदेशनालये अग्रिमगणस्य प्रशिक्षणं यदा प्रचलेत् तदवसरे बोधनाय प्रकरणमेतत् उल्लेखितुं शक्यम् इति सः अचिन्तयत्। देशे विभिन्नेषु स्थानेषु जायमानानाम् अपराधसम्बन्धिपरिस्थितीनाम् अवलोकनं कृत्वा सर्वकारस्य अवधानपथं प्रति तासाम् आनयनमेव प्रायः गुप्तचरविभागस्य कार्यं भवति।

2. द्रौपदी - आर्यपुत्र, किं जातम् ? अपि किमपि अघटितं घटितं वा तस्य यात्रायाम्?

भीमः - श्रीकृष्णबलरामयोः और्ध्वदेहिकं समाप्य पार्थः शोकाकुलाः यादवस्त्रियः तथा च बालकान् गृहीत्वा प्राचलत् । मार्गे यदा ते पञ्चनरनाम्नि प्रान्ते श्रमपरिहारार्थम् अतिष्ठन् तदा आभीरजनैः यादवस्त्रियाणाम् अपहरणम् आरब्धम् । तासां रक्षणार्थम् अर्जुनः गाण्डीवम् उद्धर्तुं प्रायतत किन्तु तस्मिन्नेव क्षणे तस्य हस्तौ अश्मवद्भूतौ । सः चापं सज्जीकर्तुमेव नाशक्नोत् । स्वबलस्य क्षयम् असहमानः सः अतः एव ...

द्रौपदी - (सनिर्वेदम्) पार्थः पराभवं न जानाति । अद्य आभीरैः तं सः दर्शितः । एतत् तु भवितव्यमेव आसीत् । इदानीं तव कथनात् तस्य पुरतः गत्वा किं तं अधिकं लज्जितं करोम्यहम् ? भीमसेन, गच्छ त्वम् । मम मनसि आलेखिता पार्थस्य प्रतिमा अजिङ्क्यवीरस्य । सा तथैव तिष्ठतु । आभीराणां पुरतः पार्थः हतप्रभः जातः इति इदं सत्यम् अहं जाने, इति तेन न कदापि ज्ञातव्यम् ! कृपया गच्छ ।

Scanned with CamScanner

3. राजा तदर्थं विज्ञाय शय्यात: भूमौ पपात। तत: सावित्रीसंज्ञा भोजस्य जननी विश्वजननीव स्थिता दासीमुखात् स्वपुत्रस्थितिमाकर्ण्य कराभ्यां नेत्रे पिधाय रुदती प्राह - पुत्र, पितृव्येन कां दशां गमितोऽसि। ये मया नियमा उपवासाश्च त्वत्कृते कृता: तेऽद्य मे विफला जाता:। दशापि दिशामुखानि शून्यानि पुत्र, देवेन सर्वज्ञेन सर्वशक्तिनामृष्टा: श्रिय:। इति बहु विललाप। मुञ्ज: पुत्रवधस्य प्रायश्चित्तार्थं राजा वह्निप्रवेशं निश्चितवान्। ततो राज्ञ: निश्चयमाकर्ण्य वत्सराजो गृहमागत्य बुद्धिसागरं नत्वा शनैस्तस्य कर्णे किमपि कथयित्वा निष्क्रान्त:। ततो मुहूर्तेन कोऽपि कापालिक: सभायां समागत:। तं दृष्ट्वा बुद्धिसागर: प्राह - योगीन्द्र कुत आगम्यते? कुत्र ते निवेशश्च। कापालिके त्वयि यश्चमत्कार: कलाविशेष: औषधिविशेषो वा तत् कथय।

4. समत्वं योग उच्यते। न योग: स्वाङ्गपीडनम् आत्महिंसा वा। न अष्टसु योगाङ्गेषु आसनं प्रधानम्। प्रधानाङ्गं तु ध्यानम् इति प्रोच्यते। आसनेन देहदार्ढ्यं शरीरस्वास्थ्यं च लब्धुं शक्यम्। योगस्य अष्टौ अङ्गानि - यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारण-ध्यान-समाधय: इति। किं तेषां प्रयोजनम्? उच्यते - योगाङ्गानुष्ठानात् अशुद्धिक्षये ज्ञानदीप्ति:। तेषाम् अहिंसा-सत्य-अस्तेय-शौच-सन्तोषादय: उपाङ्गानि। यदासनं तत् स्थिरं सुखं च स्यात्। न प्रयासपूर्वकम् अङ्गव्यवस्था तत्। आसनाभ्यासात् साधुव्यायामो भवति शरीरपुष्टि: सिद्ध्यति अपि। किन्तु चित्तमालिन्यशुद्धये आसनं न किञ्चित् कर्तुं शक्नोति। अत्रास्ति एकं परमरहस्यम्। क्रियमाणं कर्म यदि ईश्वरार्पणभावेन क्रियते तदा परिपूर्णा चित्तशुद्धि: लभ्यते।

Q.2. Translate into English / Marathi (10 marks each)

1. प्राचीना ऋषय: सर्वे यस्यां काव्यं विनिर्ममु:।
तस्यां गीर्वाणभाषायां कुर्यां मे काव्यनिर्मितिम्॥
लेखनं संस्कृते भव्यं संस्कृते भणनं प्रियम्।
श्रवणं कीर्तनं चैव कवनं मधुरं सदा॥
भाषेयं मम देशस्य दिव्या सर्वाङ्गसुन्दरी।
पुनीता वेदवेदाङ्गै: सा प्रिया मे सदा भुवि॥
जननी सर्वभाषाणां न च वृद्धा पुरातनी।
नित्ययौवनलास्यन्ती त्रिदशा विश्वमोहिनी॥
मूढा भणन्ति वृद्धेति किन्तु सा दिव्यभारती।
प्रोत्फुल्लपदसम्भारा रसभावा फलान्विता॥

Scanned with CamScanner

2. यथा कोऽपि कर्षक:
सायंतने बलीवर्दं मोचयेत् शकटात्
तथैवाहं मोचयामि शरीराद् आत्मानम्।
यथा कोऽपि वायुहस्त:
मोचयति
पुष्पं शाखाया:
तथैवाहं दूरीकरोमि शरीराद् आत्मानम्।
यथा किञ्चिदपि प्रात:
विहङ्गं मोचयति गगनं दर्शयित्वा नीडात्
तथैव
अहं शरीरात् दूरं नयाम्यात्मानम्।
यथा समुद्रवेला काऽपि
मोचयति जलबिन्दुं सिकताभ्य: स्वहस्तं प्रसार्य
तथैव
अहं प्रेरयाम्यात्मानं शरीराद् बहिरागन्तुम्॥

3. ये मूर्खा: परनिन्दनेऽतिनिपुणा: पाण्डित्यमोहाञ्चिता:।
लीलां ये रचयन्ति दोषकथनेऽन्येषां कृतौ केवलम्॥
अन्येषां च विलोकयन्ति सहजं दोषाङ्कुरं नात्मन:।
ये पाण्डित्यपदाभिमानमलिनास्ते के न जानीमहे॥
ये प्रेम्णा न वदन्ति शुद्धसरलं वाक्यं कदैकं सखे।
शुष्का ये सततं गदन्ति गहनां वाच: पुनर्भीषणाम्॥
ये बाणादधिकं भयंकरमहो संश्रावयन्ते वृथा।
येषां पादतले पतन्ति सरलास्ते के न जानीमहे॥
येषां वै रसना स्वयं विषमयी सर्पाकृतिर्भीषणा।
या नैवं भजते प्रभो: प्रियकरं नामामृतं मन्त्रकम्॥
दुर्वारा कलहं करोति सततं या कूलटारूपिणी।
येषां चित्तवने भ्रमन्त्यजगरास्ते के न जानीमहे॥

—

Scanned with CamScanner

4. क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति:।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥
मन्द: कवियश:प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामन: ॥
अथ वा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभि:।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गति:॥
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥

*****

Scanned with CamScanner

DEPARTMENT OF SANSKRIT

UNIVERSITY OF MUMBAI

M.A. Entrance Examination 2017- 2018

Paper 2: History of Classical Sanskrit Literature

Date: 07/09/2017

Day: Thursday

Duration: 3 Hours

Marks: 100

Q.1) Write exhaustive notes on **any two** of the following. (40)

1. महाकाव्यलक्षणानि ।
2. पञ्चतन्त्रम् ।
3. महाभारताधारितानि भासनाटकानि ।

Q.2. Write critical notes on **any four** of the following. (60)

1. कालिदासस्य ऋतुसंहारम् ।
2. भर्तृहरेः नीतिशतकम् ।
3. भवभूतिमतेन - एको रसः करुण एव ।
4. मृच्छकटिकम् ।
5. दूतकाव्यम् ।
6. भारवेः किरातार्जुनीयम् ।

*****

Scanned with CamScanner